# Shri GuruvargavandanA

# શ્રીગુરુવર્ગવન્દના

## Document Information

Text title : Guruvarga VandanA

File name : guruvargavandanA.itx

Category : deities_misc, gurudev, aShTaka

Location : doc_deities_misc

Latest update : May 16, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 16, 2023

*sanskritdocuments.org*

# Shri GuruvargavandanA

## શ્રીગુરુવર્ગવન્દના

કાવેરીતટ-સઞ્જાતં કાવેરીવ સુનિર્મલમ્ ।
શઙ્કરજ્યેષ્ઠ-શિષ્યં તં ગુણજ્યેષ્ઠં નમામ્યહમ્ ॥ ૧॥

નૃસિંહસાધકં વન્દે સનન્દનયતીશ્વરમ્ ।
ગુરુસ્નેહાભિષિક્તો યઃ પદ્મપાદાભિધાં ગતઃ ॥ ૨॥

યોગૈશ્વર્યવલાદ્ યો હિ મૃતે વત્સે પ્રવિશ્ય ચ ।
અજીવયન્ મૃતં બાલં તસ્મૈ નિત્યં નમોનમઃ ॥ ૩॥

હસ્તામલકવદ્ યસ્ય બ્રહ્મજ્ઞાનમબાધિતમ્ ।
તં હસ્તામલકાચાર્યં ભૂયો ભૂયો નતોઽસ્મ્યહમ્ ॥ ૪॥

શ્રીગુરોઃ સેવનેનૈવ દિવ્યજ્ઞાન-સમન્વિતઃ ।
લલિતાક્ષર-પદ્યેન ગુરોઃ સ્તોત્રમથાકરોત્ ॥ ૫॥

તોટકચ્છન્દસા સ્તોત્રં કૃત્વા ગુરુપ્રસાદકઃ ।
તોટકાખ્યાં ગતો યો વૈ તસ્મૈ નિત્યં નમોનમઃ ॥ ૬॥

વાદયુદ્ધચ્છલેનૈવ શ્રીગુરોર્ગૌરવં વ્યધાત્ ।
શાસ્ત્રતત્ત્વરહસ્યજ્ઞં તં નમામિ સુરેશ્વરમ્ ॥ ૭॥

ભાષ્ય-વાર્તિકકારો યો વેદ-વેદાન્ત-પારગઃ ।
તમહં સતતં વન્દે સુરેશ્વરયતીશ્વરમ્ ॥ ૮॥

શઙ્કરાચાર્ય્ય-સચ્છિષ્યાઃ પદ્મપાદાદિ-સંજ્ઞકાઃ ।
પ્રીયન્તાં ગુરવો નિત્યં હૃષીકેશાખ્ય-ભિક્ષુકે ॥ ૯॥

તેષાં કૃપાકણાભિક્ષુઃ જ્ઞાનામૃતબુભુક્ષુકઃ ।
શ્રીગુરૂન્ સતતં નૌતિ હૃષીકેશાખ્યભિક્ષુકઃ ॥ ૧૦॥

ઇતિ શ્રીજગન્નાથાશ્રમપૂજ્યપાદશિષ્ય-શ્રીહૃષીકેશાશ્રમવિરચિતા
શ્રીગુરુવર્ગવન્દના સમાપ્તા ।

Encoded and proofread by Rahul Gamara

*Shri GuruvargavandanA*

pdf was typeset on May 16, 2023

Please send corrections to *sanskrit@cheerful.com*